Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

सुधर्मा संस्कृतदिनपत्रिका, मैसूरु
धर्मो रक्षति रक्षितः

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका - ७० मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि द्वादश्यां शतभिषानक्षत्रयुक्त गुरुवासरः १३ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

यस्य स्नेहो भयं तस्य स्नेहो दुःखस्य भाजनम् ।
स्नेहमूलानि दुःखानि तानि त्यक्त्वा वसेत्सुखम् ॥

*One who is infatuated with someone or something faces a threat* from the same someone or something. Because it has become his weakness. It breeds a host of problems and worries. Given up infatuation if you want to be happy and in control of yourself. (कौटिल्यस्य नयः-१३)

## प्रदूषणस्य दुष्परिणामः

जगत्यद्य सर्वं प्रदूषितं वर्तते । मानवानां संख्या दिने दिने वर्धते। अत एव नगराणि भवन्ति । तत्र मालिन्यम् उत्पद्यते । अतोऽद्य पवनः, जलम्, आहारः, अन्यानि वस्तूनि च प्रदूषितान्येव लभ्यन्ते । नालिकेरजलम् अपि प्रदूषितम् इत्युक्ते किमन्यत् शुद्धं भवेत्? न केवलं भारते वर्षे, अपि तु समस्ते प्रपञ्चे एषा दुष्परिस्थितिः । पवनस्य मलिनत्वाद् विविधा रोगा उत्पद्यन्ते । जलस्याशुद्धत्वात् सहस्रैवामयाः प्रभवन्ति । अस्याः समस्यायाः मूलम् अन्विष्य तस्य उत्पाटनं कर्तव्यम् । अन्यथा मानवकुलं स्वयमेव स्वनाशं साधयिष्यति । सर्वे जनाः अद्य लाभोन्मुखाः । धनलाभाय ते किमपि कर्तुं सिद्धाः । अत एव उद्यमैः उत्पाद्यमानं कलुषितं जलम् अशोधयित्वा नदीषु विसर्जयन्ति । धूममयं पवनम् उत्पाद्य जनान् पशूंश्च त्रासयन्ति । विषमयम् आहारं जनेभ्यो विक्रीणन्ति । एवं दिने दिने प्रदूषणम् अधिकीकुर्वन्ति । प्रतिदिनं जना नूतनानि वाहनानि क्रीणन्ति । वाहनचालनेन प्रदूषणं जायत एव । पुरा तु जनाः अल्पसंख्याः आसन् । अश्वैः गर्दभैः अश्वतरैर्वा तदा ते प्रयान्ति स्म । एवं प्रदूषणं न जायते स्म। नगराणि बृहन्ति तदा नासन् । अतः कच्चरं जलं तदा नदीषु न प्रविशति स्म । अतस्तदा शुद्धाः आहारपदार्थाः लभ्यन्ते स्म । इदानीं सर्वं विपरीतम् । यदि मनुष्याणां चिन्तना न परिवर्तते, तर्हि मानवकुलस्य विनाशो भवत्येव । ततः पूर्वं धिषणा विशदा भवतु ।

## डोनाल्डट्रम्पस्य प्रमादः

वाषिङ्गटन्-अग्रिमे मासे अमेरिका देशे अध्यक्षस्थानाय निर्वाचनं भविता। तदर्थं प्रमुखः अभ्यर्थी वर्तते रिपब्लिक्नपक्षस्य डोनाल्डट्रम्पः। सः एतदर्थं त्वरितगत्या प्रचारनिरतः वर्तते । परं तेन केचन प्रमादाः अपि कृताः। एभिः तस्य स्वपक्षे एव विरोधः अधुना अद्भुतः अस्ति। सः प्रचारभाषणावसरे महिलानां विषये अश्लीषवाचः प्रयोगमकार्षीत् । तासाम् अवहेलनमपि अकरोत्। महिलानां विषये तेनोक्ताः अश्लीषवाचः अन्तर्जाले प्रसारं प्राप्ताः सन्ति । अतः जनाः बहवः तद्विषये असमाधाने सन्ति। अतः स्वपक्षस्य एव केचनट्रम्पः निर्वाचननात् दूरं गच्छेत् इति कथयन्तः सन्ति । ट्रम्पेन प्रोक्ताः वाचः अधुना तमेव आपदि निपातितवत्यः सन्ति । बहिरङ्गतया तेन महिलानां विषये उक्ताः विषयाः असभ्याः विकटतया युताश्च सन्ति इति सर्वे जनाः वदन्तः सन्ति। एतस्मिन् सन्दिग्धे सन्दर्भे ट्रम्पः महिलानां मतानि न प्राप्नोति इति तज्ज्ञाः अभिप्रायं प्रकटयन्तः सन्ति। पक्षस्य इतरे वरिष्ठाः एव अधुना ट्रम्पं न प्रित्सहमानाः वर्तन्ते। सः इतः परं स्पर्धितुं न योग्यः इति ते मन्वते। तस्य स्थाने उपाध्यक्षस्थाना काङ्क्षी मैक्प्रेन्सः अध्यक्षस्थानाय स्पर्धेत इति ते वदन्तः सन्ति । ट्रम्पस्य विरोधिनः बहवः शनिवारे सभामायोज्य एवं निर्णयं स्व्यकार्षुः। केचन साक्षात् ट्रम्पेन सह विषयमेन मधिकृत्य वार्तालापं कृतवन्तः। महिलामवहेलनं पक्षस्य वर्चसं भङ्गः। अतः पक्षः प्रमुखनिर्वाचन-सन्दर्भे शिरः अवनमय्य स्थितः। अतः भवन्तः निर्वाचने न स्पर्धन्ताम् इति आग्रहमकुर्वन्। अनेन विवादेन त्रपायुतः ट्रम्पः पक्षस्य वरिष्ठान् क्षमां याचितवान्। परं देशस्य सर्व जनानां प्रोत्साहः मम वर्तते। अतः नाहं निर्वाचनस्पर्धातः निर्गमिष्यामि। अग्रे न्यस्तः पादः न कदापि मया पृष्ठतः स्थापितः इति सः स्पष्टतया अभणत्। विरोधपक्षस्य जनास्तु विषमेतं महदस्त्ररूपेण स्व्यकार्षुः। अतः हिलारिक्लिण्टन् प्रमुखाः प्रचारभाषणे एतमेव विषयम् अग्रे स्थापयित्वा ट्रम्पस्य दौर्बल्यं प्रदर्शयन्तः सन्ति । परं रिपब्लिकन् पक्षास्तु अधुना महरि कष्टे अस्ति।

## भद्रकाल्यै दीयते सुवर्णकिरीटम्

हैदराबाद्-वारङ्गल्नगरस्य देवतायै भद्रकाल्यै तेलङ्गाणमुख्यमन्त्री श्री के. चन्द्रशेखरराव् भानुवासरे सुवर्ण-किरीटम् अर्पयति । सार्धैकादश-किलोग्रामभारयुतं किरीटं निर्मितं शिल्पिभिः त्रिकोटिरूप्यकाधिकेन धनव्ययेन । किरीटस्य अर्पणाय मुख्य मन्त्री धर्मपत्न्या श्रीमत्या शोभया सह आगतः । भगवती भद्रकाली अनयोर्दम्पत्योः सकलानि अभीष्टानि पूरयत् इति आशास्महे ।

श्रीमान् चन्द्रशेखररावमहाभागः तिरुपति श्री वेङ्कटेश्वराय सुवर्णहारं, विजयवाडानगर्यां अधिदेवतायै कनकदुर्गायै सुवर्णनासाभरणं चार्पयिष्यतीति ज्ञायते । दैवभक्ताय मुख्यमन्त्रिणे नमस्कारः सहस्रं समर्पयामः ।

## भुशुण्डीप्रयोगेण हननम्

पामस्प्रिङ्स्-कौटुम्बिककलहस्य परिहाराय गृहस्य पुरतः समागतान् सन्धानकार्यनिरतान् आरक्षकाधि-कारिणः एव कश्चन पुरुषःभुशुण्डी प्रयोगेन अहन् । अमेरिकादेशस्य क्यालिफोर्नियाराज्यस्य पाम्स्प्रिङ्ग नगरे इयं घटना समजनि । अस्मिन् आक्रमणे द्वौ आरक्षकाधिकारिणौ हतौ। अपरः एकः व्रणितः जातः। स्वपित्रा सह सः पुरुषः कलहनिरतः अवर्तत । तदा ते अधिकारिणः सन्धानं कुर्वन्तः आसन्। तेषां सन्धानवचनानि सावधानं शृण्वन् एव आसीत् सः पुरुषः । हठात् सः स्वकोषात् भुशुण्डीं स्वीकृत्य आक्रमणम् अकुर्वन् । एतं विषयं पामस्प्रिङ्ग नगरस्य आरक्षक-मुख्यस्थः ब्रानरेहसः अवोचत् । सः अल्पः कौटुम्बिककलहः। अतः त्रयः आरक्षकाधिकारिणः। समस्या परिहारे निरताः आसन्। तदा सः एतादृशं भीकरं कृत्यमकार्षीत् इति प्रत्यक्षदर्शिनः अवदन्। सः पुरुषः उन्मत्तसमः आसीत्। तस्य दुर्वर्तनया एव तस्य पत्नी तं त्यक्त्वा गतवती आसीत्। शनिवारे सः पित्रा सह अपि सामान्यकारणं किमपि पुरतः स्थापयित्वा कलहमारब्धवान्। तस्य पिता मम समीपम् आगत्य दुःखं प्रकटितवान् आसीत् इति प्रतिवेशिनी महिला पत्रकारान् अभणत् ।

## काश्मीरस्य स्वप्नं माद्राष्ट बलूचिस्तानं संरक्षत

न्यूर्याक्-विश्वसंस्थायाः महाधिवेशने सोमवारे भाषितवती भारतविदेश-व्यवहारसचिवा श्रीमती सुषमास्वराज् काश्मीरस्य स्वप्नं मा द्राष्ट, तत्तु स्वप्नेऽपि नोपलभ्यते, यौष्मकीणं बलूचिस्तानं संरक्षत' इति हितं प्रोच्य पाकिस्तानस्य नेतॄन् प्राबेधयत्। हिन्द्या भाषितं कृतवती सा बलूचिस्ताने सम्पद्यमानं मानवाधि-काराणां दमनं हिंसाचरणं च व्यवृणोत् । ये देशाः स्वयं भयोत्पादनां प्रायोजयन्ति पालयन्ति पोषयन्ति च ते देशाः पृष्टतः कर्तव्याः। तेषां सहायकाः अनुकम्पिनश्च देशाः अभिज्ञेयाः। भयोत्पादानां स्वीयं धनागारं नास्ति; शस्त्रनिर्माणाय स्वस्थानं नास्ति। तथापि ते धनसाहाय्यं लभन्ते शस्त्राणि लभन्ते । तेषामुपरि दृष्टिपात आवश्यकः। तदैव तन्नियन्त्रणं भवितेति सा न्यगादीत् ।

## विजयदशमी विजयम् आनयत्

इन्दूर्-विजयदशम्यां भारतवर्षस्य क्रिकेट्क्रीडकाः अद्भुतं कौशलं प्रदर्श्य न्यूजिलेण्ड्देशस्य क्रीडक-समुदायं पराजित्य विजयलक्ष्मीम् आलिङ्गन्। स्पर्धात्रयसरण्यां तिस्रोऽपि स्पर्धा भारताय विजयम् एव प्रायच्छन् इति महतः प्रमोदस्य स्थानम्। कोहलीविराटो भारत-समुदायस्य नायको भूत्वा विजयम् आनैषीदिति विशेषतः अभिनन्दनम् अर्हति ।

## भारतदेशस्य वातावरणं मलिनम्

नवदिल्ली-वातावरणमालिन्यविषये विश्वस्मिन् भारतं द्वितीयं स्थानं लभते। प्रथमस्थानं लभते चीनदेशः। भारतदेशे प्रतिवर्षं षड्लक्षाधिका जनाः वातावरणमालिन्यकारणेन यमालयं प्रतिशन्ति । भूमौ स्थितेषु देशेषु वस्तुम् अयोग्यो देशोऽयम् इति विश्वस्वास्थ्यसंस्था (World Health Organisation) न्यवेदयत्। चीनदेशे प्रतिवर्षं दशलक्षाधिकाः प्रजाः वातावरणमालिन्यकारणेन मृत्युकवली भवन्ति इति च तया संस्थया निगदितम्। वाहनानाम् आधिक्यं वातावरणं मलिनयति। नगरकेन्द्रप्रदेशेषु ये वसन्ति, ते सततं धूलिकणान् श्वासेन सह स्वीकुर्वन्ति। एवं बहवः उद्यमा अपि वातं धूलिकणैः कलुषितं कुर्वन्ति ।

## विद्यार्थिराक्षसास्सन्ति

नवदिल्ली-पश्चिमदिल्लीप्रदेशे सर्वकारीयशालायाः द्वौ विद्यार्थिनौ हिन्दी उपाध्यायं मुखेशकुमारं छुरिकया विद्ध्वा अवधिष्टाम् इति दारुणा वार्ता श्रूयते । तौ विद्यार्थिनौ सदा अविधेयौ आस्तां शालाया निष्कासितौ च । तयोर्दुष्टयोः एकः आरक्षकैर्निगृहीतः। द्वादशकक्ष्यायाः तौ विद्यार्थिनौ शालापरिसरे एवैतादृशं दुष्कार्यं कृतवन्ताविति उद्विग्नाः अध्यापकाः प्रतिभटनां कृत्वा सुरक्षां प्रदातुं सर्वकारं प्रार्थयन्त ।

## हैटीप्रदेशे चण्डमारुतः

हैटीति कथ्यमानः स्तोकगात्रो द्वीपदेशः चण्डमारुतेन नितरां पीडितोऽभवत् । चण्डमारुः वृष्टिसहितो जञ्झेति कथ्यते । मारुतस्य वेगेन वृष्ट्याघातेन च हैटीद्वीपः पीडितः। मार्कीं सहस्रं जनाः मृत्युग्रासी भूताः । बहवोऽदृश्या जाताः। गृहादिविनाशस्य गणनां कर्तुं न कश्चित् शक्नोति । चण्डमारुतः अमेरिकादेशस्य दिशि गच्छतीति ज्ञायते। नैसर्गिकोऽयं प्रकोपः न केनापि नियन्त्रयितुं शक्यः ।

## वेदान्ताचार्याणां तिरुनक्षत्रमहोत्सवः

मैसूरु-अत्रत्ये राजसौध प्राङ्गणे विराजमानानां श्री श्वेतवराहस्वामिनां तथा श्री प्रसन्नकृष्णस्वामिनां देवालयेषु वेदान्ताचार्याणां तिरुनक्षत्रमहोत्सवः श्री वेङ्कटेश सभायाः आश्रये महता वैभवेन प्राचलत् ।